नारदवचनेन स्त्रीणां कोषादेर्विधानात् । तदन्यदम्बुविषयमित्युक्तं विद्यारण्यश्रीपादैः । विज्ञानेश्वराचार्य्यास्तु पुंस्त्रियोर्विवादे इच्छया वान्यतरः कुर्य्यादित्यनेन पक्षे स्त्रीणामपि दिव्यप्रसक्तौ पुरुषस्यैव दिव्यं न स्त्रीणामित्येतत्परमिदम् । अन्यथा सर्व्वथा तासां दिव्यनिषेधे धटकोषादिभिस्तासामन्तस्तत्त्वं विचारयेदित्यनेन विरोधः स्यादिति प्राहुः । कात्यायनः "गोरक्षकान् वाणिजकांस्तथा कारुकुशीलवान् । प्रेष्यान् वार्द्धुषिकांश्चैव ग्राहयेच्छूद्रवद्द्विजान्" । कालिकापुराणेऽपि "वर्णान्त्यस्य सदा देयं माषकं तप्तहेमजमिति" । वर्णानामन्त्यः प्रत्यन्तः तस्येत्यर्थः । नारदोऽपि "महापराधे निर्द्धर्मे कृतघ्ने क्लीवकुत्सिते । नास्तिके दृष्टदोषे च शप्नानां तु विवर्जयेत्" इति । कात्यायनोऽपि "मातापितृद्विजगुरुवृद्धस्त्रीबालघातिनाम् । महापातकयुक्तानां नास्तिकानां विशेषतः । लिङ्गिनां प्रमदानाञ्च मन्त्रयोगक्रियाविदाम् । वर्णसङ्करजातानां पापाभ्यासप्रवर्त्तिनाम् । एतेष्वेवाभियोगेषु निन्द्येष्वेवं प्रवर्त्तितः । दिव्यं प्रकल्पयेन्नैव राजा धर्म्मपरायणः । एतैरेव नियुक्तानां साधूनां दिव्यमर्हति । न सन्ति साधवो यत्र तत्र शोध्याः स्वकैर्नरैरिति" । साधूनां दिव्यमर्हति राजा कल्पयितुमिति शेषः । प्रतिनिधिद्वारा एतैर्दिव्यं कारणीयमिति द्रढयितुमाह स एव "महापातकयुक्तेषु नास्तिकेषु विशेषतः । न देयं तेषु दिव्यन्तु पापाभ्यासरते भृगुः । येषु पापेषु दिव्यानि कर्त्तव्यानि प्रयत्नतः । तारयेत्सज्जनैस्तानि नाभिशस्तं त्यजेन्नर इति" । तारयेत् शोधयेत् । अभिशोधनं प्रतिनिधिद्वारा शोधनमकारयित्वा न त्यजेदित्यर्थः । यत्तु तेनैवोक्तम् "अस्पृश्याधमदासानां म्लेच्छानां पापकारिणाम् । प्रातिलोम्यप्रसूतानां निश्चयो न तु राजनि । तत्प्रसिद्धानि दिव्यानि संशये तेषु निर्द्दिशेदिति" । तत्तैर्नियुक्तानां साधूनामभावे विज्ञेयम् । तत्प्रसिद्धानि घटादीनि इति स्मृतितत्त्वे । साधूनामप्यसामर्थ्ये प्रतिनिधिमप्युपजानाति स एव "कालदेशाविरोधे तु यथायुक्तं प्रकल्पयेत् । अन्येन हारयेद्दिव्यं विधिरेष विपर्य्ययः" । सामर्थ्याभावे सर्व्ववर्णविषये विशेषमाह हारीतः, "राजन्येऽग्निं घटं विप्रे वैश्ये तोयन्नियोजयेत् । न विषं ब्राह्मणे दद्याद्विषं वर्णान्तरे स्मृतम् । कोषतण्डुलधर्म्मास्तु सर्व्वस्यैव च ।

पुत्रदारादिशपथान् सर्व्ववर्णे प्रयोजयेत्" इति । अथ दिव्यकालः तत्र पितामहः "यो यस्य विहितः कालो विधिर्यस्य च यो यथा । तं प्रवक्ष्यामि तत्त्वेन वादिनस्य बलाबलम् । चैत्रो मार्गशिराश्चैव वैशाखश्च तथैव च । एते साधारणा मासा दिव्यानामविरोधिनः । धटः सर्व्वर्त्तुकः प्रोक्तो वाते वाति विवर्जयेत् । अग्निः शिशिरहेमन्तवर्षासु परिकीर्त्तितः । शरद्ग्रीष्मे च सलिलं हेमन्ते शिशिरे विषमिति" । विष्णुरपि स्त्रीब्राह्मणविकलाऽसमर्थरोगिणां न तुला देया न वाति वायौ न कुष्ठ्यसमर्थलोहकाराणामग्निर्देयः शरद्ग्रीष्मयोश्च न कुष्ठिपैत्तिकब्राह्मणानां विषं देयं प्रावृषि च । न श्लैष्मिकाणां व्याध्यर्द्दितानां भीरूणां श्वासकासिनामम्बुजीविनामुदकं हेमन्तशिशिरयोश्चेति । हेमन्तनिषेधोऽत्र पौषमासविषय एव न तु मार्गशीर्षविषयोऽपि । मार्गशीर्षस्य "चैत्रो मार्गशिरा इति पूर्व्वोदाहृतपितामहवचनेन सकलदिव्यसाधारणत्वाभिधानात् । नारदोऽपि "विचार्य्य धर्म्मनिपुणैर्धर्म्मशास्त्रविशारदैः । धर्म्मं सर्व्वर्त्तुकं प्रोक्तं पण्डितैर्धटधारणम् । वर्षासु समये वह्निर्हेमन्तशिशिरे तथा । ग्रीष्मे सलिलमित्युक्तं विषं काले तु शीतले । न शीते तोयशुद्धिः स्यान्नोष्णकालेऽग्निशोधनम् । न प्रावृषि विषं दद्यात् प्रवाते न तुलां तथा । नापराह्णे न सन्ध्यायां न मध्याह्ने कदाचनेति" । मध्याह्ने दिव्यनिषेधो जलव्यतिरिक्तविषयः । अतएव पितामहः "पूर्व्वाह्णेऽग्निपरीक्षा स्यात् पूर्व्वाह्णे च धटो भवेत् । मध्याह्ने तु जलं देयं धर्म्मतत्त्वमभीप्सता । दिवसस्य तु पूर्व्वाह्णे कोषशुद्धिर्विधीयते । रात्रौ तु पश्चिमे भागे विषं देयं सुशीतलमिति" । अत्र विषस्य वर्षासु निषेधात् सिंहरवावेव परीक्षामात्र निषेधाच्च दिव्यान्तरं सिंहेतरवर्षास्वपि कुर्व्वन्ति । अतः "याम्यायने हरौ सुप्ते सर्व्वकर्म्माणि वर्जयेदित्यस्य न विषयः । तथा च ज्योतिषे "सिंहस्थे मकरस्थे च जीवे चास्तमिते भृगौ । मलमासे न कर्त्तव्या परीक्षा जयकाङ्क्षिणा" । तथा "रविशुद्धौ गुरौ चैव न शुक्रेऽस्तंगते पुनः । सिंहस्थे च रवौ नैव परीक्षा शस्यते बुधैः । नाष्टम्यां न चतुर्द्दश्यां प्रायश्चित्तपरीक्षणे । न परीक्षाविवाहश्च शनिभौमदिने भवेत्" । रविशुद्धौ गुरौ चेदित्यत्र शस्यत इति शेषः तथा च दीपिकायाम् "न शुक्रास्तेऽष्टमेऽर्के गुरुसहितरवौ जन्ममासेऽष्टमेऽब्दे